International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 11 Issue 09, September- 2021
ISSN: 2249-7382 | Impact Factor: 8.018|
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

# पञ्चकं प्रातिपदिकार्थः

**डॉ. नन्द किशोर तिवारी**
सहायकाचार्यः व्याकरणविद्याशाखा
केन्द्रीय-संस्कृत-विश्वद्यालयः,
भोपाल-परिसरः भोपालम्
मध्यप्रदेशः -462043

**सारांशः-**

शब्दस्य शब्दसमूहरूपवाक्यस्य प्रयोगं कृत्वा वयं कञ्चिदर्थमवगच्छामः इतरेषाम् जनानां प्रत्यपि विवक्षितार्थं सम्प्रेषयामः। वाक्येन आकाङ्क्षादिवशात् वाक्यार्थः प्रतीयते न वेति अत्र विचारस्य विषयः नास्ति। अपितु अस्मिन् शोधपत्रे विचारितो वर्तते यत् पदादर्थः यः प्रतीयते तत्र सुपां प्रकृतीनां प्रातिपदिकसंज्ञकशब्दानां केऽर्थाः सन्ति कति चार्थाः सन्ति। अत्र परमप्रमाणभूतेन महाभाष्याभिप्रायेण अन्यतश्चा प्रमाणं गृहीत्वा स्थापिमस्ति यत् प्रातिपदिकानां प्रवृत्तिनिमित्तव्यक्तिलिङ्गसंख्याकारकाणि पञ्च अर्थाः सन्ति अथ च शब्दोऽपि अथ च तदर्थो भवति।

**कूटशब्दाः-** आख्यातम्, आकृतिः, अधिकरणम्, द्रव्याभिधानम्।

**प्रस्तावना -**

सुप्तिङन्तं पदम्[1] इति महर्षिपाणिनिप्रोक्तेन शास्त्रेण सुबन्ततदादीनां तिङन्ततदादीनाञ्च पदशब्देन व्यवहारो भवतीति प्रसिद्धिरस्ति। सप्तभिर्विभक्तिभिर्विभक्तानाम् एकविंशतिसङ्ख्यकानां स्वादिप्रत्ययानां प्रकृतिः प्रातिपदिकानि भवन्ति इति स्वादिविधौ प्रातिपदिकाधिकारात्तां सञ्ज्ञामाह[2] अर्थवदित्यादिभिर्बहुभिः शेखरादिस्थैः प्रसङ्गसङ्गतिबोधकैर्वाक्यैः प्रतीयते। अष्टाध्यायाः तृतीयेऽध्याये स्थितास्तिबादिप्रत्ययाः अनुबन्धभेदाद्भिन्नानां लडादिदशलकाराणां स्थाने लस्य[3] इत्यधिकारशास्त्रप्रामाण्यात् आदिश्यन्ते, ते च लकाराः धातोः[4] इति सूत्राधिकारे पठितत्वात् धातुसंज्ञकेभ्यः भूवादिशब्देभ्यस्तथा च सनाद्यन्ततदादिशब्देभ्य[5] एव विधीयन्ते इति। अत्र एतदपि ज्ञातव्यं यत् प्रातिपदिकस्य कृते नामशब्दस्यापि प्रयोगो भवति। यद्यपि "चत्वारि शृङ्गा त्रयोऽस्य पादाः

---

[1] पाणिनीयं सूत्रम् – 1.4.14।
[2] ल.श. शे.अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इत्यत्र।
[3] पाणिनीयं सूत्रम् – 3.4.77।
[4] पाणिनीयं सूत्रम् – 3.1.91।
[5] सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विब्णिज्यङौ तथा।यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः

द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश"[6] इति ऋङ्मन्त्रस्य व्याख्यानकाले महाभाष्ये चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेति महाभाष्यकारीयवचनस्य विवरणं महावैयाकरणेन नागेशभट्टेन नामशब्देन सुबन्तं नमत्याख्यातार्थम्प्रति विशेषणीभवतीति व्युत्पत्ते:,आख्यातं तिङन्तम्'[7] इत्युक्तं तेन ज्ञायते यदापातत: सुबन्तमेव नामपदवाच्यं भवति तथापि विभक्तिबोधकसुप्प्रत्ययरहितानि प्रातिपदिकान्येव नामपदवाच्यत्वमर्हन्ति।[8] इदं सर्वं नामार्थप्रकरणे स्वयं नागेशेनैव मुहुर्मुहुर्निगदितम्। अपि च अविभक्तिकं नाम[9] इति सारस्वतव्याकरणे यदुक्तन्तेन तथा च "निरुक्ता प्रकृतिर्द्वेधा नामधातुप्रभेदत:। यत्प्रातिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते॥ [10] येन स्वीय यदर्थस्य मुख्यत: प्रतिपादने । स्वोत्तरं प्रथमापेक्ष्या तन्नाम स्यात्तदर्थकम्॥"इति शब्दशक्तिप्रकाशिकायां नैयायिकचक्रचूडामणिना आचार्य जगदीशभट्टेनापि यदुच्यते तेनापीदमेव प्रतीयते यत् विभक्तिबोधकसुबादिप्रत्ययं विनैवार्थवन्त: शब्दा नामपदवाच्या: भवन्ति। कृत्तद्धितसमासाश्च [11] इति सूत्रबोधितानि कृदन्ततदादीनि तद्धितान्ततदादीनि समाससञ्ज्ञकान्यपि च प्रातिपदिकान्येव भवन्ति। स्वरूपपरतयोच्चारिता निपातादिपदबोध्या: शब्दा अपि तथाभूतान्येव बोध्यानि।

प्रतिपाद्यविषय: -

सम्प्रत्येव तिङां प्रकृतय: धातुसंज्ञका शब्दा: भवन्ति अथ च सुपां प्रकृतय: प्रातिपदिकानि भवन्तीति व्यवस्थितम्। उपरोक्तकथनेन ये शब्दा: प्रातिपदिकसञ्ज्ञका: सन्ति त एव नामपदवाच्या भवन्ति इत्यपि लभ्यते। इदानी नामार्थ: क इति जिज्ञासायां पदार्थनिर्णयाधिकरणे महाभाष्यकृन्महामुनि: पतञ्जलिर्निजगाद किं पुनराकृति: पदार्थ: आहोस्विद्द्रव्यम् ? उभयमित्याह'[12] इति। उभयोर्नामार्थत्वे च महर्षिणा प्रमाणभूतं सूत्रद्वयमुपन्यस्तम्। तद्यथा उभयथा ह्याचार्येण सूत्राणि पठितानि आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् इत्युच्यते। द्रव्यं पदार्थं मत्वा सरूपाणामेकशेष इत्येकशेष आरभ्यते।[13] नामार्थविषयकोऽयं प्रश्न: प्रचीनकालादेव अद्यावधि सततं प्रचलन्नस्ति। सरूपाणामेकशेष एकविभक्तौ[14] इति सूत्रस्य महाभाष्ये तादृशौ द्वौ सिद्धान्तौ वर्णितौ स्त: यौ दृष्ट्वा

---

6 महाभाष्ये पस्पशाह्निके प्रयोजनाधिकरणे।

7 तत्रैवोद्योते।

8 प्रवृत्तिनिमित्तंव्यक्ते: प्रातिपदिकत्वम्, लिङ्गमपि प्रातिपदिकार्थ: प्रत्ययानां द्योतकत्वात्, संख्यापि नामार्थ: विभक्तीनां द्योतकत्वात्,कारकमपि प्रातिपदिकार्थ: इत्यादि मञ्जूषावचनानि प्रत्ययरहितानां प्रातिपदिकत्वमुद्घोषयन्ति।

9 विभक्तिरहितं धातुवर्जितं चार्थवच्छब्दस्वरूपं नामोच्यते, सारस्वतव्याकरणे स्वरान्ता: पुंल्लिँङ्गा: प्रकरणे।

10 शब्दशक्तिप्रकाशिकायाम् - 1.13।

11 पाणिनीयं सूत्रम् – 1.2.46।

12 पातञ्जले महाभाष्ये पदार्थनिर्णयाधिकरणे पस्पशाह्निके।

13 तत्रैव महाभाष्ये पदार्थनिर्णयाधिकरणे पस्पशाह्निके

14 पाणिनीयं सूत्रम् – 1.2.64 ।

ज्ञायते यत् वाजप्यायनो नाम कश्चनाचार्यो बभूव य: आकृतिं पदार्थोऽस्तीति मन्यते स्म। तत्रत्य भाष्यमित्थं वर्तते - आकृत्यभिधानात् वैकं विभक्तौ वाजप्यायन:[15] आकृत्यभिधानाद् वैकं शब्दं विभक्तौ वाजप्यायन मन्यते। एकाकृति: सा चाभिधीयते इति प्रख्याविशेषात् न हि गौरित्युक्ते विशेष: प्रख्यायते-शुक्ला नीला कपिला कपोतिकेति।[16] तत्र आकृत्यभिधानाद् इति प्रतीकं गृहीत्वा प्रदीपकारेणोच्यते यत् जाति: शब्दार्थ: तस्या एकत्वादनेकशब्दप्रयोगप्रसङ्ग एव नास्ति[17] इति मीमांसादर्शने चायमेव सिद्धान्त:स्वीकृतोऽस्ति। अनेन जातिपदार्थवादिमतेन गौ: इत्युच्चारणानन्तरं न नीलादिनां बोध उपजायते किन्तु गोत्वसामान्यस्यैव बोधो भवति। तत्राभेदेन एकस्मिन्नुपदिष्टे सति देशान्तरे कालान्तरे चा व्यक्त्यन्तराणां बोध: स्वयमेव भवति। धर्मशास्त्रादिषु ब्राह्मणं न हन्यात् सुरां न पिबेत् इत्यादिवचनानि जातिपदार्थवादिपक्षे[18] एवोपपद्यन्ते। यतोहि व्यक्ति: पदार्थ इति मते एकस्य ब्राह्मणस्य हननं सुरापानं च शास्त्रानुमोदितं भविष्यति इति कामचारात् अनियमप्रसङ्गात् अनिष्टप्राप्तिर्भविष्यति,तदित्थं जातिरेव पदार्थ इति लभ्यते।

जातिपदार्थवादिमतविरुद्धम् आचार्यस्य व्याडेर्मतेन द्रव्ये एव पदार्थे लिङ्गवचनयोर्व्यवस्था उपपद्यते जातौ लिङ्गवचनयोर्व्यवस्था नैवोपपत्स्यते। अस्याचार्यस्य मतं सङ्कलयता महभाष्यकृतोच्यते द्रव्याभिधानं व्याडि:।[19] द्रव्याभिधानं व्याडिराचार्यो न्याय्यं मन्यते।[20]तथा च लिङ्गवचनसिद्धि:[21] एवञ्च कृत्वा लिङ्गवचनादिसिद्धानि भवन्ति। ब्राह्मणी ब्राह्मण: ब्राह्मणौ ब्राह्मणा:[22] चोदनासु तस्यारम्भात्[23] इति वार्तिके उक्तं यत् प्रेरणाव्यवहारोऽपि व्यक्तावेव भवितुमर्हति न जातौ। यथा गामानय इति कथनानन्तरं गोद्रव्यमेवानीयते गोत्वस्यानयनस्यासम्भवात् सा नानीयते। सा च जातिरेककालावच्छेदेन युगपद्भिन्नेषु भिन्नेष्वधिकरणेषु तथैव न स्थातुं शक्नोति यथा कश्चित्पुरुषो न स्थातुं शक्नोति। अनेन प्रकारेण जाते: पदार्थत्वं न सिध्यति। विनाशे प्रादुर्भावे सर्वं तथा स्यात्[24] इति वार्तिके केवलस्य जाते: पदार्थत्वं निराकुर्वता उक्तं महाभाष्ये यत् जाति: यदि पदार्थ: स्यात् तर्हि एकस्या: गोव्यक्तेविनाशे सर्वस्या विनाशः स्यात् तथा चैकस्य उत्पत्तौ सर्वोऽप्युत्पद्येत। किञ्च वैरूप्यस्य प्रतिव्यक्त्युपलभ्यमानत्वाज्जातौ तस्य सर्वथाऽभावात् भिन्नार्थकेषु शब्देषु द्रव्यस्यैव भिन्नर्थत्वमाश्रित्य एकशेषो भवतीति सर्वं विचार्य न जतिरेव पदार्थोऽपितु द्रव्य एवेति आचार्यस्य

15 सरूपाणामित्यादिसूत्रे भाष्यवार्तिकम्।

16 तत्रैव महाभाष्यम्।

17 तत्रैव प्रदीपे।

18 न ब्राह्मणं हन्यादि’त्यादौ जात्याश्रयसकलविषयत्वार्थमेव – सकृद्गतौ यदित्यादिपरिभाषायाम्।

19 सरूपाणामित्यादिसूत्रे भाष्यवार्तिकम्।

20 तत्रैव महाभाष्यम्।

21 तत्रैव महाभाष्यम्।

22 तत्रैव महाभाष्यम्।

23 तत्रैव महाभाष्यम्।

24 सरूपाणामित्यादिसूत्रे भाष्यवार्तिकम्।

व्याडेर्मतम्मुल्लिखितं महाभाष्ये। तदित्थं आचार्यो वाजप्यायन:तथा चाचार्यो व्याडिरेकपदार्थवादिनौ स्त: इति प्रतिभाति।

एको नामार्थ इति मतविरुद्धं पदार्थस्य विषये शब्दानुशासनशास्त्रस्य प्रवक्तारो भगवन्त: पाणिनिवररुचिपतञ्जलयोऽस्माकं त्रयोऽप्याचार्या: विशिष्टपदार्थवादिनस्सन्तीति प्रतीयते। आचार्यस्य पाणिनेर्मतं महाभाष्यकारेण स्वयमेव पस्पशाह्निके प्रतिपादितम्।[25] जातिशब्देन हि द्रव्याभिधानम् इति कात्यायनीय वार्तिकस्य भाष्ये जातिशब्देन हि द्रव्यमप्यभिधीयते जातिरपि इति महर्षेर्वचसा विशिष्टे पदर्थत्वमस्तीति तेषां हार्दं प्रतिभाति। स्वीयकथनस्य समर्थने कथं पुनर्ज्ञायते जातिशब्देन द्रव्यमप्यभिधीयते इति? एवं हि कश्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति अस्यत्र काञ्चिद् गां पश्यसीति? स पश्यति "पश्यति चायं गा: पृच्छति च काञ्चिद् गां पश्यसीति। नूनमस्य द्रव्यं विवक्षितम्[26] इति लौकिकव्यवहारस्य उद्धरणेनैतत् सुष्ठुतरम्प्रतीयते यन्महाभाष्यकारो भगवान् जातिविशिष्टव्यक्ति: पदार्थो भवतीत्यङ्गीकरोति। हर्यादिभिराचार्यैपि नूनमेव सिद्धान्तोऽयमङ्गीकृत इति कृत्वा जातिसमुदितो व्यक्ति: प्रातिपदिकार्थोऽस्ति इति वैयाकरणानां सिद्धान्त:।

पदार्थप्रतिपादनप्रसङ्गे आचार्यव्याडिमतपोषके "तथा च लिङ्गवचनसिद्धि:।[27] एवञ्च कृत्वा लिङ्गवचनसिद्धानि भवन्ति'[28] इति वार्तिकेन तत्रत्य भाष्यवचनेन च लिङ्गवचनयोरपि प्रातिपदिकार्थत्वमायाति। एकं द्विकं त्रिकमित्यादि वैयाकरणभूषणकारिकाया व्याख्यानावसरे कथितेन त्रिकमिति जातिव्यक्तिलिङ्गानीत्यर्थ[29] इति कौण्डभट्टीयवचनेन जातिव्यक्तिलिङ्गेतित्रितयनिष्ठत्वमपि प्रातिपदिकार्थस्यास्तीति वैयाकरणानां मतं वरीवर्ति । शब्दरूपाश्रयावेयं द्विलिङ्गताक्वचिदर्थभेदेनापि व्यवतिष्ठते। यथा पद्मशङ्खशब्दौ निधिवचनौ पुँल्लिङ्गौ। जलजे उभयलिङ्गौ[30] इति काशिकावृत्तिकृता लिङ्गस्य शब्दाश्रितत्वमुद्घोषितम्। तत्र तदशिष्यं सञ्ज्ञाप्रमाणत्वात्[31] इति त्रिमुनिव्याकरणस्याद्यर्षे एकार्थे शब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वमिति[32] शब्दश्रितत्वमुद्घोषितमिति द्वितीयर्षे एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम् दृश्यते यथा पुष्य: तारका नक्षत्रम्। गेहं कुटी मठ[33] इति तृतीयर्षेर्वचान्सि च मानानि सन्ति। एवमेव लिङ्गवचनसिद्धिर्गुणविवक्षानित्यत्वात् गुणवचनवद्वा लिङ्गानि भवन्ति इति सरूपसूत्रभाष्येण चापि लिङ्गस्य प्रातिपदिकार्थत्वं निर्विवादम्। टाबादय:

---

25 नित्याकृति:,कथम्? न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति। पस्पशाह्निके।

26 जात्याख्यायामित्यादि सूत्रे भाष्यवार्तिकम्।

27 सरूपाणामित्यादिसूत्रे भाष्यवार्तिकम् ।

28 तत्रैव महाभाष्यम्।

29 वैयाकरणभूषणसारे नामार्थनिर्णये कारिका- 25।

30 अर्धर्चा: पुंसि च इत्यस्य काशिकायाम्।

31 पा. सू. -1.2.53 ।

32 तत्रैव महाभाष्यम्।

33 तस्यापत्यम् सूत्रस्य भाष्यवार्तिकम्, तत्रत्य भाष्यञ्च।

प्रत्यया: केवलं स्त्रीत्वाद्यर्थान् द्योतयन्ति अस्मादेव कारणात् वाक् उपानद् आदि शब्दश्रवणसमनन्तरमेव स्त्रीप्रत्यायमन्तरा एव स्त्रीत्वस्य प्रतीत्या स्त्रीत्वादयोऽपि प्रातिपदिकार्था एवेति महावैयाकरणस्य नागेशभट्टस्यापि सम्मतिरस्ति। अतो जातिव्यक्तिसहकृतं लिङ्गमपि नामार्थेति त्रितयनिष्ठो नामार्थ:।

एकत्वादिसङ्ख्यापि नामार्थो भवति। प्रमाणरूपेण आदिर्ञिटुडव:[34] इति सूत्रमुपस्थापयति नागेशभट्ट:। अत्र तेषां तात्पर्यमस्ति यत् सूत्रेऽस्मिन्नन्वयेन व्यतिरेकेण च सुपामर्थ: सङ्ख्या भवेत्तर्हि आदिरिति पदे बहुत्वस्यार्थस्य बोधनाय जस्प्रत्ययस्य प्रयोग अवश्यं करणीय :। तथा सति जसोऽभावे बहुत्वप्रतीतिरसंभव:। किन्तु तदभावेऽपि तत्र प्रकृतिगतस्य बहुत्वस्यनुभूतिर्भवतीति वीक्ष्य सङ्ख्यापि प्रकृतेरेवार्थ अर्थात् नामार्थोऽस्ति। अतो नागेशभट्टेनोक्तं परमलघुमञ्जूषायाम् सङ्ख्यापि नामार्थ: विभक्तीनां द्योतकत्वात्[35] इति। किन्तु अवश्यं चैतदेवं विज्ञेयमेकत्वादयो विभक्त्यर्था[36] इति भाष्येण प्रतीयते यन्नामार्थत्वं सङ्ख्याया नास्तीति। नागेशभट्टश्च तत्रापि एकत्वादयो विभक्त्यर्था इति भाष्यस्य व्याख्यानं वस्तुतस्तु “वाचिका द्योतिका वा स्युर्द्वित्वादिनां विभक्तय: यद्वा संख्यावतोर्यस्य समुदायोऽभिधायक:”[37] एकत्वादयो वाक्यपदीये विभक्त्यर्था इत्यस्य सूत्रे प्राधान्येन विभक्तिद्योत्यत्वेन बोधिता इत्यर्थ इति प्रदीपोद्योते कथयन् नामार्थत्वमेव संख्याया उररीकरोति। स्वार्थद्रव्यलिङ्गसंख्याकर्मादिलक्षण: पञ्चक: प्रतिपदिकार्थ इति कैयटवचनमपि अमुमर्थं द्रढयति।

वैयाकरणानां सिद्धान्तानुसारं कर्मादिकारकण्यपि प्रतिपदिकार्थान्येव वरीवर्तन्ते। सम्प्रत्युद्धृतेन कैयटवचनेन इदमेव प्रतीयते।[38]अस्मादेव कारणात् एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथेति’ वैयाकरणभूषणकारिकायां पठितस्य पञ्चकमिति पदस्य –कारकसहितं चतुष्कमित्यर्थ इति वैयाकरणभूषणसारेऽप्युक्तम्। तत्रान्वयव्यतिरेकाभ्यां कारकं प्रत्ययार्थ एव किमर्थो भवितुं नार्हति यतोहि अमादिसाहचर्यादेव कर्मादीनां प्रतीति: संभवतीति प्रश्ने भूषणकारादीनां कथनमस्ति यत् प्रत्यायरहिते दधि पश्य इत्यादौ प्रत्यायमजानतोऽपि बोधोदयात् प्रकृतेरेव वाचत्वं कल्प्यते। भावोऽयमस्ति यत् विभक्तिबोधकप्रत्ययमन्तरैव मधु तिष्ठति दधि पश्य इत्यदि वाक्यश्रवणवेलायां कर्त्रादिकारकाणां प्रतीतिर्भवति संघुष्यैव शब्दरूपाणि कण्ठस्थीकृतवतोऽवैयाकरणस्य यस्य शब्दसाधुत्वप्रक्रियाया ज्ञानं नैवास्ति तादृशपुरुषस्यापि यथावदेव कारकाणां ज्ञानं भवत्येव । न च तादृश: पुरुष: प्रकृत्यां स्मृत्वा

[34] पा. सू. - 1.3.5 ।

[35] परमलघुमञ्जूषायाम्,नामार्थप्रकरणे।

[36] अनभिहिते इति सूत्रे भाष्यम्।

[37] वा. प . – 2.164 ।

[38] अनभिहिते इति सूत्रारम्भसामर्थ्यात् कर्मादीना नैव विभक्तिवाच्यत्वम्- बहुषु बहुवचनम् इत्यत्र नैव कर्मादय: विभर्था: इति भाष्यस्य प्रदीपव्याख्यायाम्।

अर्थबोधं सम्पादयति। अनेन च अयमेव सिद्ध्यति यत् कारकमपि प्रातिपदिकार्थ एवास्ति। अस्मादेव कारणात् –

एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा। नामार्थ इति सर्वेऽमी पक्षा: शास्त्रे व्यवस्थिता:॥ इत्युक्तं सर्वतन्त्रस्वतन्त्रेण श्रीमता भट्टोजिदीक्षितेन वैयाकरणभूषणकारिकायाम्। किञ्च विष्णुमुच्चारयति इत्यादिवाक्यानां श्रवणेन प्रतीयते यत् विष्णु इत्यानुपूर्वीमत: शब्दस्योच्चारणं करोति नत्वर्थस्येति कृत्वा शब्दोऽपि नामार्थ इति।

**उपसंहार:**

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा। नामार्थ इति सर्वेऽमी पक्षा: शास्त्रे व्यवस्थिता:। इति वैयाकरणभूषणकारिकानुसारं एकं प्रतिपदिकार्थ: प्रवृत्तिरूप: भवतीति महर्षेर्वाजप्यायनस्य मतेन सिद्ध्यति। व्याडिमतेन जातौ कार्यासम्भवात् व्यक्तिरेक एव पदार्थ: इति स्वीकृतम्। किन्तु एतद्वतिरिक्तं लिङ्गसंख्याकारकाण्यपि प्रतिपदिकानामेवार्था: सन्तीति कृत्वा प्रातिपदिकानां जतिव्यक्तिगिङ्गसंख्याकारक इति पञ्चापि अर्था: भवन्ति।